प्रश्न—पत्र काप्रारूप

कक्षा— 12 विषय—संस्कृतसाहित्यम् अवधि— सपादहोरात्रयम् पूर्णांक — 80

1. उद्देश्य हेतुअंकभार —

| क्र.सं. | उद्देश्य | अंकभार | प्रतिशत |
|---|---|---|---|
| 1. | ज्ञान | 18 | 22.50 |
| 2. | अवबोध / अर्थग्रहण | 26 | 32.50 |
| 3. | ज्ञानोपयोग / अभिव्यक्ति | 19 | 23.75 |
| 4. | कौशल / मौलिकता | 17 | 21.75 |
| | योग | 80 | 100 |

2. प्रश्नों के प्रकार एवंअंकभार—

| क्र.सं. | प्रश्नों के प्रकार | प्रश्नों की संख्या | अंकप्रतिप्रश्न | कुलअंक | प्रतिशत | सम्भावित समय |
|---|---|---|---|---|---|---|
| 1. | वस्तुनिष्ठ / बहुविकल्पात्मक | | | | | |
| 2. | अतिलघूत्तरात्मक | 6 | 1 | 6 | 7.50 | |
| 3. | लघूत्तरात्मक I | 9 | 2 | 18 | 22.50 | |
| 4. | लघूत्तरात्मक II | 6 | 3 | 18 | 22.50 | |
| 5. | निबंधात्मक | 9 | 4, 5 | 38 | 47.50 | |
| | योग | 30 | | 80 | 100 | |

विकल्प योजना : आन्तरिक पुनरावलोकन ..........................................

3. विषय वस्तुकाअंकभार —

| क्र.सं. | इकाई | अंकभार | प्रतिशत |
|---|---|---|---|
| | पठितांशअवबोधनम् | 12 | |
| 1. | गद्यांश | 4 | 5 |
| 2. | पद्यांश | 4 | 5 |
| 3. | नाटयांश | 4 | 5 |
| 4. | प्रश्ननिर्माण, अन्वय, शब्दार्थ, भावार्थ, | 12 | 15 |
| 5. | पाठ्य पुस्तकआधारितभाषिककार्यम् | 06 | 7.5 |
| 6. | संस्कृतसाहित्येतिहासः | 10 | 12.5 |
| 7. | छन्दः | 05 | 6.25 |
| 8. | अलंकारः | 05 | 6.25 |
| 9. | अपठितांशअवबोधनम् | 04 | 5 |
| 10. | अपठितांशअवबोधनम् | 04 | 5 |
| 11. | संकेताधारितवर्णनम् | 05 | 6.25 |
| 12 | अनुवादकार्यम् | 05 | 6.25 |
| | व्याकरणम् | | |
| 13. | सन्धिः | 04 | 5 |
| 14. | कारकम् | 04 | 5 |
| 15. | समासः | 04 | 5 |
| | | | |

# मॉडलप्रश्न पत्र ब्ल्यूप्रिन्ट

विषय :–संस्कृतसाहित्यम् कक्षा–12 पूर्णाक :– 80

| क्रं. सं. | उद्देश्य इकाई/उपइकाई | ज्ञान | | | | अवबोध | | | | ज्ञानोपयोगी/अभिव्यक्ति | | | | कौशल/मौलिकता | | | | योग |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | अति लघु | लघु. SA1 | लघु. SA2 | निबं | अतिलघु | लघु. SA1 | लघु. SA2 | निबं | अतिलघु | लघु. SA1 | लघु. SA2 | निबं | अति लघु | लघु. SA1 | लघु. SA2 | निबं | |
| | पठितांशावबोधनम् | – | – | – | – | – | – | – | – | – | – | – | – | – | – | – | – | |
| 1. | गद्यांशः | – | – | – | – | – | – | – | 2⁺(1) | – | – | – | 2(–) | – | – | – | – | 4 (1) |
| 2. | पद्यांशः | – | – | – | 1⁺(1) | – | – | – | 1(–) | – | – | – | 2 (–) | – | – | – | – | 4 (1) |
| 3. | नाट्यांशः | – | – | – | 1⁺(1) | – | – | – | 1(–) | – | – | – | 2 (–) | – | – | – | | 4 (1) |
| 4. | प्रश्ननिर्माण, अन्वयः, शब्दार्थ, भावार्थ | – | 2(1) | – | – | – | – | 6 (2) | – | – | – | – | – | – | – | – | 4(1) | 12 (4) |
| 5. | पाठ्यपुस्तकाधारितंभाषिक कार्यम् | – | – | – | – | 6 (6) | | – | – | – | – | – | – | – | – | – | – | 6 (6) |
| 6. | संस्कृतसाहित्येतिहासः | – | 2 (1) | 3 (1) | – | – | – | 3 (1) | | | | – | – | – | 2 (1) | – | | 10 (4) |
| 7. | छन्दः | – | – | 3* (1) | – | – | – | – | – | – | 2* (1) | – | – | – | – | – | | 5 (2) |
| 8. | अलंकार : | – | – | – | – | – | – | – | – | – | 2* (1) | 3* (1) | | – | – | – | – | 5 (2) |
| 9. | लघु–अपठितांशः (40–60 शब्द) | – | – | – | – | – | – | – | 2⁺(1) | – | – | – | 2 (–) | – | – | – | – | 4 (1) |
| 10. | लघु–अपठितांशः (80–100 शब्द) | – | – | – | 2⁺ (1) | – | – | – | 1 (–) | – | – | – | – | – | – | – | 1(–) | 4 (1) |
| 11 | संकेताधारित/क्रमायोजन | – | – | – | – | – | – | – | – | – | – | – | – | – | – | – | 5*(1) | 5 (1) |
| 12. | अनुवादकार्यम् | – | – | – | – | – | – | – | – | – | – | – | – | – | – | – | 5*(1) | 5 (1) |
| | व्याकरणम् | – | – | – | – | – | – | – | – | – | – | – | – | – | – | – | – | – |
| 13. | सन्धिः | – | 2 (1) | – | – | – | 2 (1) | – | – | – | – | – | – | – | – | – | – | 4 (2) |
| 14. | कारकम् | – | – | | – | – | – | – | – | – | – | – | 4 (1) | – | – | – | – | 4 (1) |
| 15. | समासः | – | 2 (1) | | – | – | 2 (1) | – | – | – | – | – | – | – | – | – | – | 4 (2) |
| | योग | – | 8 (4) | 6 (2) | 4 (3) | 6 (6) | 4 (2) | 9 (3) | 7 (2) | – | 4 (2) | 3 (1) | 12(1) | – | 2 (1) | – | 15(3) | 80(30) |

विकल्पों की योजना :–प्रश्न संख्या 18, 19, 20, 21, 24, 25 लिए है।

नोट :–कोष्ठकमेंबाहर की संख्या अंको की तथाभीतरप्रश्नों के

# संस्कृत साहित्यम्

समय– 3.15 घण्टे पूर्णाङ्क 80

परीक्षार्थिभ्य: सामान्य निर्देशा:

1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक अनिवार्यत: लेख्य:।

2) सर्वे प्रश्ना: अनिवार्या:।

3) प्रत्येकस्य प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम्।

4) प्रत्येकस्य प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम्।

**प्र. 1. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** 4

जातं वंशे भुवनविदिते पुष्करावर्तकानां,
जानामि त्वां प्रकृति–पुरुषं कामरूपं मघोन:।
तेनार्थित्वं त्वयि विधिवशात् दूरबन्धुर्गतोऽहम्
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।।

(क) यक्षानुसारेण मेघा: केषां वंशे उत्पन्ना: आसन् ? 1

(ख) 'दूरबन्धुर्गतोऽहम्' इत्यत्र दूरबन्धु: शब्दस्य क: अभिप्राय: ? 1

(ग) 'याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामां' इति सूक्तिवाक्यं व्याख्यायत। 2

**प्र. 2. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** 4

भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणा:। गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य। इतरस्य तु करिण इव शङ्खाभरणमाननशोभासमुदयमधिकतरमुपजनयति। हरत्यतिमलिनमन्धकारमिव दोषजातं प्रदोषसमयनिशाकर इव। गुरूपदेश: प्रशमहेतुर्वय: परिणाम इव पलितरूपेण शिरसिजजालममलीकुर्वन् गुणरूपेण तदेव परिणमयति।

(क) उपदेशगुणा: कुत्र सुखेन प्रविशन्ति? (पूर्णवाक्येन उत्तरं दीयताम्) 1

(ख) 'अभव्यस्य श्रवणस्थितं गुरुवचनं किं उपजनयति ? 1

(ग) 'भवादृशा एव भवन्ति भाजनान्युपदेशानाम्' इत्यत्र भवादृशा इत्ययं शब्द: कस्य कृते प्रयुक्त:,
किमर्थं चायम् उपदेशयोग्य: अस्ति ? 2

**प्र. 3. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** 4

सीता – बहुमानितास्मि पूर्वविरहे।

राम: – दु:खायैव सुहृदामिदानीम् रामदर्शनम्। तदनुजानीहि मां गमनाय।

सीता - (तमसामाश्लिष्य) हा भगवति तमसे, गच्छतीदानीमार्यपुत्र:। किं करोमि ? (इति मूर्च्छति)

तमसा - वत्से जानकि! समाश्वसिहि। विधिस्तवानुकूलो भविष्यति। तदायुष्मतो: कुशलवयोर्वर्षर्द्धिमङ्गलानि संपादयितुं भागीरथीपदान्तिकमेव गच्छाव:।

राम: - अस्ति चेदानीमश्वमेधसहधर्मचारिणी मे।

सीता - (साक्षेपम्) आर्यपुत्र: क: ?

वासन्ती - परिणीतमपि किम् ?

राम: - नहि, नहि, हिरण्यमयी सीताप्रतिकृति:।

सीता - (सोच्छ्वासास्रम्) आर्यपुत्र, इदानीमसि त्वं। अहो उत्खातितमिदानीं मे परित्यागशल्यमार्यपुत्रेण।

(क) रामस्य अश्वमेध-सहधर्मचारिणी का आसीत् ? (पूर्णवाक्येन उत्तरं दीयताम्) 1

(ख) 'प्रतिकूल' इति पदस्य विलोम: नाट्यांशात् चिनुत। 1

(ग) तमसा सीतां भागीरथी समीपं केन प्रयोजनेन गन्तुं कथयति ? 2

**प्र. 4. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत -** 3

(क) चारुदत्त: <u>अवन्तिपूर्यां</u> निवसति स्म ।

(ख) गते व्याघ्रे तत्र <u>चित्रक:</u> समाययौ ।

(ग) <u>प्रयत्नं</u> विना साफल्यं न लभते।

**प्र. 5. निम्नलिखित वाक्ययो: भावार्थ: हिन्द्यां संस्कृते वा लिखत ।** 4

(क) समत्वं योग उच्यते ।

(ख) चत्वारि तस्य वर्द्धन्ते आयुर्विद्यायशोबलम् ।

**प्र. 6. अधोलिखित श्लोकस्य अन्वय-सहितं सरलम् अर्थं हिन्द्यां संस्कृते वा लिखत -** 3

अल्पानामपिवस्तूनां संहति: कार्यसाधिका।
तृणैर्गुणत्वमापन्नै: बध्यन्ते मत्तदन्तिन: ।।

**प्र. 7. निम्नलिखितयो: शब्दयो: हिन्दीभाषायां आंग्लभाषायां वा अर्थं लिखत -** 2

(1) हविषा

(2) प्रावारक:

**प्र. 8.** 'यत्नमातिष्ठेत् विद्वान्' इत्यत्र आतिष्ठेत् क्रियाया: कर्ता क: ? 1

**प्र. 9.** 'परं हन्त हन्त! सङ्कटनात्मिकां बुद्धिं दूरतस्त्यजाम:' इत्यत्र 'बुद्धिं' इति पदस्य विशेषणं पदं चिनुत। 1

**प्र. 10.** 'छायेव तां भूपतिरन्वगच्छत्' इत्यत्र 'तां' सर्वनामस्थाने संज्ञा पदस्य प्रयोगं कुरुत। 1

प्र. 11. स्वामिन् ! त्वदीयोऽहं लागुडिकः। इति कः कस्मै कथयति? 1

प्र. 12. 'माता गुरुतरा भूमेः' इत्यत्र रेखाङ्कितपदस्य विलोम पदं लिखत। 1

प्र. 13. 'महीयांसः प्रकृत्या मितभाषिणः' रेखाङ्कितपदस्य पर्याय पदं लिखत। 1

प्र. 14. चतुर्णां वेदानां संक्षिप्तं वर्णनं कुरुत। 3

प्र. 15. काद बर्याः संक्षिप्तं परिचयं लिखत। 2

प्र. 16. मुद्राराक्षस-नाटकस्य वैशिष्ट्यं लिखत। 2

**प्र. 17. निम्नलिखित-प्रश्नानां संक्षिप्तम् उत्तरं लिखत –** 3

(क) आचार्य मधुकरशास्त्रिणा रचितस्य महाकाव्यस्य किं नाम अस्ति ?

(ख) ईश्वरविलासः इति महाकाव्यस्य लेखकः कः अस्ति ?

(ग) पं. गुलाबचन्द्रचूलेटः केन पुरस्कारेण विभूषितः आसीत् ?

**प्र. 18. अधोलिखितेषु कस्यापि एकस्य छन्दसः लक्षणोदाहरणे लिखत –** 3

(क) उपजाति

(ख) वसन्ततिलका

(ग) मन्दाक्रान्ता

**प्र. 19. निम्नलिखित-कस्यापि एकस्याः पंक्त्याः गणचिह्नं प्रदर्शयन् छन्दसः नामोल्लेखं कुरुत –** 2

(क) कुपुत्रो जायेत क्वचिदपि कुमाता न भवति।

(ख) सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा।

**प्र. 20. अधोलिखितेषु कस्यापि एकस्य अलङ्कारस्य लक्षणोदाहरणे लिखत –** 3

(क) यमकम्

(ख) उपमा

(ग) अर्थान्तरन्यासः

**प्र. 21. निम्नलिखितेषु कस्यामपि एकस्यां पंक्त्यां प्रयुक्त-अलङ्कारस्य नामोल्लेखपूर्वकं लक्षणं लिखत –** 2

(क) कावेरी वारि पावन-पवनः।

(ख) संसार-विषवृक्षस्य द्वे एव रसवत्फले ।

**प्र. 22. अधोलिखितं अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –** 4

अस्मिन् संसारे द्विविधाः जनाः दृश्यन्ते। केचन भाग्यवादिनः अपरे पुरुषार्थशीलाः। भाग्यवादिनः कथयन्ति यत् – भाग्यं फलति सर्वत्र न तु विद्या न च पौरुषम् इति। नरः किमपि कुत्रापि न करोति, ईश्वरेच्छा सदा बलीयसी भवति। पुरुषार्थशालिनः वदन्ति यत् उन्नतिः पुरुषार्थेन एव भवति। अभीष्टपदार्थानां सुखम् आप्तुम् उद्योग एव मुख्यं साधनम्। सुखस्य कारणं उद्योगः अस्ति दुःखस्य च आलस्यम्।

(क) 'भाग्यं फलति सर्वत्र न तु विद्या न च पौरुषम्' इति के कथयन्ति ? (एकपदेन उत्तरं)

(ख) अभीष्टपदार्थानां सुखम् आप्तुम् मुख्यं साधनम् किम्? (पूर्णवाक्येन उत्तरं दीयताम्)

(ग) द्विविधा: जना: '' इत्यत्र विशेषणं विशेष्य-पदं किम् ?

(घ) पुरुषार्थशालिन: किं वदन्ति ?

**प्र. 23. अधोलिखित अपठितं गद्यांशं पठित्वा निर्देशानुसारं प्रश्नानाम् उत्तराणि लिखत - 4**

परेषाम् उपकार: परोपकार: इति कथ्यते। प्राणिनाम् उपकार: परोपकारोऽस्ति। मनसा, वाचा, कर्मणा परेषां हितानुष्ठानमेव परोपकारोऽस्ति। सत्पुरुषा: कदापि स्वार्थतत्परा: न भवन्ति। ते सर्वदा परेषां हितसाधनार्थं तत्परा: भवन्ति। वृक्षा: अपि स्वकीयान् फ लान् अन्यान् ददति। परोपकारिण: जना: तु परेषां दु:खं स्वीयं दु:खं मत्वा तन्नाशाय यतन्ते। ते निर्धने यो धनं, वस्त्रहीने यो वस्त्रं, पिपासिते यो जलं, बुभुक्षिते यो अन्नम्, अशिक्षिते यश्च शिक्षां ददति। परोपकारेण हृदयं पवित्रं सरलं सरसं सदयं च भवति। परोपकारभावनयैव दधीचि: देवानां हिताय स्वीयानि अस्थीनि अददत्।

(क) के कदापि स्वार्थतत्परा: न भवन्ति ? (एकपदेन उत्तरं दीयताम्)

(ख) क: देवानां हिताय स्वीयानि अस्थीनि अददत? (पूर्णवाक्येन उत्तरं दीयताम्)

(ग) 'ते सर्वदा परेषां हितसाधनार्थं तत्परा: भवन्ति' इत्यत्र सर्वनाम पदं चिनुत।

(घ) गद्यांशस्य समुचितं शीर्षकं लिखत ।

**प्र. 24. प्रदत्त-शब्दानां प्रयोगं कुर्वन् एकम् अनुच्छेदं लिखत - 5**

सतां सङ्गति:, मानव-जीवने, फलम्, महत्त्वं, मूर्ख:, प्रवीणताम्, विचारधारा, यश:, गुणयुक्त:,दोषनिवारण:, कुसङ्गति:, विनाश:, सत्सङ्गति:, सन्त:, महिमानम्।

अथवा

क्रमरहितानि वाक्यानि समुचित क्रमानुसारं लिखत ।

(क) नीचै: स्थित: बालक: एकमुपायं चिन्तयति।

(ख) प्रथम: बालक: उक्तवान् यत् ऋक्ष: कथितवान् 'विश्वासो तस्य न कर्तव्य: आपत्काले जहाति य:'।

(ग) वृक्षस्थ बालक: वृक्षात् अवतीर्य आगत्य च पृच्छति यत् ऋक्ष: तस्य कर्णे किं कथितवान्।

(घ) गमनात् पूर्वं तौ प्रतिज्ञातवन्तौ यत यदि कापि समस्या आगमिष्यति तदा तौ परस्परं सहायतां करिष्यत:।

(ड.) उपायानुसारं स: आत्मानं मृतवत् संदर्श्य भूमौ निपतति।

(च) एकदा एकस्मिन् नगरे निवसन्तौ द्वौ बालकौ नगरगमनाय प्रस्थानं कृतवन्तौ।

(छ) ऋक्ष: तत्रागत्य बालकस्य कर्णं समीपं मुखं कृत्वा घ्रात्वा च मृतं विज्ञाय वनं प्रतिगच्छति।

(ज) तौ येन मार्गेण गतवन्तौ तत्र सुविशालं भयंकरं वनक्षेत्रम् आसीत्।

(झ) ध्वनि श्रुत्वा एक: बालक: तु शीघ्रं वृक्षम् आरोहति किन्तु अन्य: आरोहणं न जानाति स्म।

(ञ) यदा तौ वनं प्रविष्टौ तदा तौ ऋक्षस्य ध्वनिं शृणुत:।

**प्र. 25. नि नलिखितेषु वाक्येषु केषाञ्चित् पञ्चवाक्यानां संस्कृतभाषायां अनुवादं कु रुत -** 5

(क) राम पत्र लिखता है।

(ख) गाँव के दोनों ओर वृक्ष हैं।

(ग) वह कानों से बहरा है।

(घ) वृक्ष से पत्ता गिरता है।

(ड.) याचक राजा से धन मांगता है।

(च) गङ्गा हिमालय से प्रकट होती है।

(छ) कवियों में कालिदास श्रेष्ठ हैं।

(ज) बालक को पुष्प अच्छा लगता है।

**प्र. 26. अधोलिखित-पदानां सूत्रोल्लेखपूर्वकं सन्धि-विच्छेदं कु रुत -** 2

(क) दैत्यारि: (ख) प्रेजते

**प्र. 27. अधोलिखित-पदानां सूत्रोल्लेखपूर्वकं सन्धिं कु रुत -** 2

(क) मधु + अरि: (ख) कृष्ण + एकत्वम्

**प्र. 28. निम्नलिखितेषु रेखाङ्कित पदेषु प्रयुक्त-विभक्ते: नामोल्लेखं कृत्वा तस्य सूत्रं चापि लिखत।** 4

(क) मोहन: ग्रामं प्रति गच्छति।

(ख) शिष्याय स्वस्ति।

(ग) जटाभि: तापस: प्रतीयते।

(घ) हरि: असुरात् त्रायते।

**प्र. 29. अधोलिखित-पदयो: प्रयुक्तसमासस्य नामोल्लेखपूर्वकं विग्रहं कुरुत -** 2

(क) उपकृष्णम् (ख) प्राप्तोदक:

**प्र. 30. अधोलिखित-विग्रहवाक्ययो: समासं कृत्वा समासस्य नामोल्लेखमपि कु रुत -** 2

(क) कृष्ण: च असौ सर्प: (ख) हरिश्च हरश्च

--इति--

# आदर्श प्रश्न पत्रम्
# उच्च माध्यमिक परीक्षा 2018
# उत्तर तालिका संस्कृतम साहित्यम्

| प्रश्न संख्या | अपेक्षित उत्तर | खंडवार अंक | अंक | पाठ्य पुस्तक की संख्या |
|---|---|---|---|---|
| 1 | (क) पुष्करावर्तन का नाम्<br>(ख) यस्य बन्धुः दूरं गतः अर्थात् पक्षः<br>(ग) विवेकानुसारं सूक्तिवाक्यस्यव्याख्या अपेक्षिता | | 1<br>1<br>2 | 36<br>36<br>36 |
| 2 | (क) निर्मले मनसि उपदेश गुणाः सुखेन प्रविशन्ति<br>(ख) शूलम्<br>(ग) चन्द्रपीडस्य कृते। यौवराज्याभिषेकसमये (विस्तारं विवेकानुसारम्) | | 1<br>1<br>2 | 08<br>08<br>08 |
| 3 | (क) हिरण्यमयी सीताप्रतिकृतिः।<br>(ख) अनुकूल।<br>(ग) कुशलवयोर्वर्षर्द्धिं मंगलानि सम्पादयितुं (विस्तार विवेकानुसारम्) | | 1<br>1<br>2 | 90<br>90<br>90 |
| 4 | (क) कुत्र<br>(ख) कः<br>(ग) किम् | | 1<br>1<br>1 | |
| 5 | (क) विवेकानुसारम्<br>(ख) ʼʼ | | 2<br>2 | 26<br>18 |
| 6 | विवकानुसारम् | | 3 | 110 |
| 7 | (क) हवि अथवा आहुति द्वारा<br>(ख) उत्तरीयं वस्त्रम् | | 1<br>1 | 20<br>53 |
| 8 | विद्वान् | | 1 | 18 |
| 9 | सङूटनानात्मिकाम् | | 1 | 111 |
| 10 | नन्दिनीम्/धेनुम् | | 1 | 60 |
| 11 | क्षगालः सिंहम् | | 1 | 97 |
| 12 | लघुतरा | | 1 | 75 |
| 13 | स्वभावेन | | 1 | 81 |
| 14 | स्वविवेकानुसारं विस्तार : अपेक्षितः। | | 3 | 139,144 |
| 15 | स्वविवेकानुसारं विस्तार : अपेक्षितः। | | 2 | 162 |
| 16 | स्वविवेकानुसारं विस्तार : अपेक्षितः। | | 2 | 155 |
| 17 | (क) श्री महावीर सौरभम्<br>(ख) श्रीसीतारामङ्टः पर्वर्णिकर :<br>(ग) माघ पुरस्कारेण | | 1<br>1<br>1 | 174<br>171<br>176 |
| 18 | स्वविवेकानुसारं विस्तार : अपेक्षितः। | | 3 | |
| 19 | स्वविवेकानुसारं विस्तार : अपेक्षितः। | | 2 | 130,132 |
| 20 | स्वविवेकानुसारं विस्तार : अपेक्षितः। | | 3 | 122,128 |

# आदर्श प्रश्न पत्रम्
# उच्च माध्यमिक परीक्षा 2018
# उत्तर तालिका संस्कृतम साहित्यम्

| | | | | |
|---|---|---|---|---|
| 21 | स्वविवेकानुसारं विस्तार : अपेक्षितः। | | 2 | 122,128 |
| 22 | (क) भाग्यवादिनः<br>(ख) उद्योगः एव<br>(ग) द्विविधाः– विशेषणम् जनाः– विशेष्यम्<br>(घ) यत् उन्नति : पुरूषार्थेन एव भवति । | | 1<br>1<br>1<br>1 | |
| 23 | (क) परोपकारी जना :।<br>(ख) महर्षि दाधीचिः।<br>(ग) ते<br>(घ) परोपकाराय इदं शरीरम् अथवा विवेकानुसारम् | | 1<br>1<br>1<br>1 | |
| 24 | स्वविवेकानुसारं विस्तार : अपेक्षितः। | | 5 | |
| 25 | (क) रामः पत्रं लिखति।<br>(ख) ग्राम अभितः वृक्षाः सन्ति।<br>(ग) सः कर्णाभ्यां बधिरः।<br>(घ) वृक्षात् पत्रं पतति।<br>(ङ.) याचक राजानं धनं याचते।<br>(च) गंगा हिमालयात् प्रभावति।<br>(छ) कविषु / कविनां कालिदासः श्रेष्ठः।<br>(ज) बालकः पुष्पाय स्पृह्यति। | | 1<br>1<br>1<br>1<br>1<br>1<br>1<br>1 | |
| 26 | (क) अकः सवर्णे दीर्घः<br>(ख) एडि. पररूपम् | | 1<br>1 | 192<br>192 |
| 27 | (क) इको यणचि<br>(ख) वृद्धिरेचि | | 1<br>1 | 188<br>191 |
| 28 | (क) अभितः परित समया निकषा हा प्रति योगे – द्वितीया<br>(ख) नमः स्वस्ति स्वाहास्वधाडल वष्ट योगाच्य – चतुर्थी<br>(ग) इत्थंभूतलक्षणे – तृतीया<br>(घ) भीत्रार्थाना भयहेतुः – पंचमी | | 1<br>1<br>1<br>1 | 208<br>210<br>209<br>211 |
| 29 | (क) कृष्णस्य समीपम् – अव्ययीभाव समास<br>(ख) प्राप्तम् उदकं यं सः – बहुब्रीहि समास | | 1<br>1 | 198<br>201 |
| 30 | (क) कृष्णसर्प :, कर्मधारय समास<br>(ख) हरि हरौ :, द्वन्द्व समास | | 1<br>1 | 200<br>202 |